दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-200 | 1 | मई 13, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णैकादशी
बैशाख 30 प्रविष्ठांशः मङ्गलमयः भवेत्

2 HP PANCHAYAT ELECTION- जिलापरिषदः सङ्घर्षः, अधुना प्रतिष्ठायाः विषयः सञ्जातः,
3 चिट्टा-विक्रयिणः अधिकारिणः कर्मचारिणः च भविष्यन्ति पदच्युताः, सेवनकर्तॄणां भविष्यति अन्वेषणं विभागीय-सचिवेभ्यः प्रदत्ता सूची
4 अधिकमासः, दानधर्मः, त्रयस्त्रिंशद्वस्तूनि, अपूपदानपरम्परा च

# हिमन्ता बिस्व शर्मा असम-राज्यस्य मुख्यमन्त्री रूपेण शपथं गृहीतवान्




भारतीय-जनता-पार्टी इत्यस्य वरिष्ठनेता हिमन्ता बिस्व शर्मा द्वितीयवारं असम-राज्यस्य मुख्यमन्त्री रूपेण शपथम् अकरोत्। गुवाहाटी-नगरस्य खानापारा-स्थितस्य पशु-चिकित्सा-महाविद्यालयस्य प्राङ्गणे आयोजितस्य एकस्य भव्यसमारोहस्य मध्ये राज्यपालः लक्ष्मण प्रसाद आचार्यः डॉ. शर्मावर्याय पदस्य गोपनीयतायाः च शपथं कारितवान्।

## मन्त्रिमण्डलस्य विस्तारः

डॉ. शर्मा महोदयेन सह अन्ये चत्वारः विधायकाः अपि मन्त्रिरूपेण शपथम् अगृह्णन्। तेषु रामेश्वर तेली, अजन्ता नियोगश्च (भाजपा) अतुल बोरा (असम गण परिषदः) चरण बोरो च (बोडोलैंड पीपुल्स फ्रंट) प्रमुखाः सन्ति । अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री अमित शाहः, रक्षामन्त्री राजनाथ सिंहः च उपस्थिताः आसन्। एतैः सह बहवः केन्द्रीयमन्त्रिणः भाजपा-शासितराज्यानां मुख्यमन्त्रिणः अपि समारोहस्य शोभां वर्धितवन्तः।

## निर्वाचनपरिणामाः

असम विधानसभायां राष्ट्रिय लोकतान्त्रिक गठबन्धन (NDA) दलेन निरन्तरं तृतीयवारं सत्ता प्राप्ता। १२६ सदस्यीय-विधानसभायां गठबन्धनेन १०२ स्थानानि जितानि। भारतीय जनता पार्टी इति दलेन ८२ स्थानानि (सर्वाधिकं बृहत् दलम्) प्राप्तानि। असम गण परिषदा १० स्थानानि तथा बोडोलैंड पीपुल्स फ्रंट इति दलेन १० स्थानानि प्राप्तानि

# नीट-यूजी (NEET-UG) परीक्षायाः निरस्तीकरणम्: सर्वकारस्य घोषणा

सर्वकारेण स्पष्टीकृतं यत् नीट-यूजी प्रश्नपत्र-भेद (Paper leak) प्रकरणे ये केऽपि संलग्नाः सन्ति, ते सर्वे निगृहीत्वा कारागारं प्रेषयिष्यन्ते, येन छात्राणां भविष्ये कोऽपि प्रतिकूलः प्रभावः न भवेत्। नवदेहल्याम् आयोजितस्य एकस्य वार्ताहरसम्मेलनस्य सम्बोधनकाले राष्ट्रिय-परीक्षा-संस्थायाः (NTA) महानिदेशकः अभिषेक सिंहः निम्नलिखितमुख्यांशान् उक्तवान् -

**शुल्क-प्रतिर्पणम्:**राष्ट्रिय-परीक्षा-संस्था (NTA) सर्वेभ्यः छात्रेभ्यः नीट-यूजी परीक्षायाः शुल्कं प्रतिर्पयिष्यति ।

**पुनः परीक्षाः-**इयं परीक्षा पुनः आयोजयिष्यते। एषा प्रक्रिया पूर्णतः निष्पक्षा भविष्यति, तथा च अस्य कृते छात्रेभ्यः किमपि अतिरिक्तं शुल्कं न ग्रहीष्यते।

**उचितनिर्णयः**-महानिदेशकः अवदत् यत् यदि परीक्षायाः सुचारुप्रक्रियायां स्वल्पः अपि सन्देहः जायते, तर्हि परीक्षायाः निरस्तीकरणमेव श्रेष्ठः तथा उचितः निर्णयः अस्ति।

## भारत-नेपालयोः सम्बन्धः



भारत-नेपालयोः सम्बन्धे श्री जायसवालः उक्तवान् यत् उभयोः देशयोः मध्ये बहुआयामी सम्बन्धः अस्ति। नेपालस्य निर्वाचनानन्तरं प्रधानमन्त्री मोदी तत्रत्यं प्रधानमन्त्रिणं बलेंद्र शाहं वर्धापितवान्। एषा मैत्री भारतस्य 'प्रतिबद्धतां' दर्शयति। विदेशमन्त्री जयशंकरः सम्प्रति मॉरीशस-देशे नेपालस्य विदेशमन्त्रिणा शिशिर खनालवर्येण सह मिलितवान्। अपि च, विदेशसचिवः विक्रम मिस्री नेपाल-यात्रायाः निमन्त्रणं प्राप्तवान्।

## प्रतिवेशि-प्रथम-नीतिः

श्री जायसवालः स्पष्टीकृतवान् यत् 'प्रतिवेशि-प्रथम-नीति' अन्तर्गतं भारतं स्वप्रतिवेशिदेशेभ्यः ऊर्जा-उत्पादानाम् आपूर्तिं निरन्तरं करिष्यति। अमेरिका-राष्ट्रपतिनः डोनाल्ड ट्रम्पस्य चीन-यात्रायाः विषये सः अवदत् यत् भारतस्य वैदेशिक-सम्बन्धाः अतिदृढाः सन्ति।

# ब्रिक्स विदेशमन्त्रिणां सम्मेलनम्

### भारतं मई-मासस्य चतुर्दश (१४) पञ्चदश (१५) दिनाङ्कयोः ब्रिक्स (BRICS) विदेशमन्त्रिणाम् उपवेशनस्य आतिथ्यं करिष्यति।




भारतं मई-मासस्य चतुर्दश (१४) पञ्चदश (१५) दिनाङ्कयोः ब्रिक्स (BRICS) विदेशमन्त्रिणां उपवेशनस्य आतिथ्यं करिष्यति विदेशमन्त्री डॉ. एस. जयशंकरः अस्याः गोष्ठ्याः अध्यक्षतां करिष्यति। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः नवदेहल्यां सूचितवान् यत् ब्रिक्स-सदस्यदेशानां प्रतिनिधयः विदेशमन्त्रिणश्च अत्र भागं ग्रहीष्यन्ति। ते सर्वे प्रधानमन्त्रिणा नरेन्द्रमोदिना सह अपि मेलनं करिष्यन्ति। अस्मिन् सम्मेलने वैश्विक-क्षेत्रीय-विषयेषु गम्भीरा चर्चा भविष्यति।

## प्रधानमन्त्रिणः विदेशयात्राः

संयुक्त-अरब-अमीरातदेशे प्रधानमन्त्रिणः यात्रायां ऊर्जा-सुरक्षा, व्यापारः तथा निवेशः इति मुख्यविषयाः भविष्यन्ति। नार्वे, स्वीडन, इटली, नीदरलैंडः एते देशाः नूतन-प्रविधेः (Innovation) तथा स्वच्छ-ऊर्जायाः केन्द्राणि सन्ति। प्रधानमन्त्री एतेषु विषयेषु तत्र चर्चां करिष्यति। 'ऑपरेशन सिंदूर' विषये पृष्टे सति प्रवक्ता उक्तवान् यत् एषा कार्यप्रक्रिया पहलगाम-आतङ्कवादिनः आक्रमणस्य उचितं प्रत्युत्तरम् आसीत्। अस्य लक्ष्यं पाकिस्तान-पोषितं आतङ्कवादि-तन्त्रं विनाश्यम् आसीत्।

# सुभाषितम्

**अवशेन्द्रियचित्तानां, हस्तिस्नानमिव क्रिया।**
**दुर्भगाभरणप्रायो ज्ञानं, भारः क्रियां बिना॥**

भावार्थः- जिनकी इन्द्रियां और चित्त वश में नहीं है, उनका व्यवहार हाथी के स्नान के समान निष्फल है और इसी प्रकार क्रिया के विना ज्ञान, दुर्भाग्यशाली स्त्रियों के आभूषणों के समान निष्फल ही है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भारतस्य नवीकरणीय-ऊर्जा-क्षमतायां विश्वे तीव्रतमा वृद्धिः अङ्किता: केन्द्रीयमन्त्री प्रह्लाद जोशी




नवीन-एवं-नवीकरणीय-ऊर्जा-मन्त्री प्रह्लाद जोशी उक्तवान् अस्ति यत् भारतेन एकस्मिन् वर्षे नवीकरणीय-ऊर्जा-क्षमतायां विश्वस्य तीव्रतमा वृद्धिः अङ्किता। अद्य नवदिल्ल्यां भारतीय-उद्योग-परिसङ्घस्य (CII) वार्षिक-व्यापार-शिखरसम्मेलने सः एतां वार्तां कथितवान्। ऊर्जाक्षेत्रे देशस्य प्रगतिविषये श्रीजोशी महोदयः अवदत् यत् वर्तमानासु वैश्विक-अनिश्चिततासु अपि भारतं सुदृढस्थितौ वर्तते।

# HP PANCHAYAT ELECTION- जिलापरिषदः सङ्घर्षः, अधुना प्रतिष्ठायाः विषयः सञ्जातः, हिमाचलस्य १२ जनपदेषु नवसु जिला-परिषत्सु भाजपा-दलस्य आधिपत्यम्




**हिमसंस्कृतवार्ताः- शिमला।** पञ्चायतीराज-संस्थानां निर्वाचनेषु जिला-परिषदः नेतृत्वं प्राप्तुं भाजपा-काङ्ग्रेस-पक्षयोः मध्ये अस्मिन्नवसरे तीव्रः सङ्घर्षः भविष्यति। यद्यपि काङ्ग्रेसपक्षेण पञ्चायतीराज-निर्वाचनेषु आधिकारिक- प्रत्याशिनः क्षेत्रे न अवतारिताः, तथापि विधायकाः स्थानीयनेतारश्च एतेषु निर्वाचनेषु गाम्भीर्यं प्रदर्शयन्ति, प्रदेशस्य जनपद-परिषत्सु काङ्ग्रेस-पक्षस्य वर्चस्वं स्थापयितुं क्षेत्रे संलग्नाः सन्ति। जिला-परिषत्सु अधिकारं प्राप्तुं भाजपा-काङ्ग्रेस-पक्षयोः मध्ये एषः वारः साक्षात् प्रतिष्ठायाः युद्धं भवितुं गच्छति।सूचनानुसारं गते कार्यकाले १२ जनपदेषु नवसु जनपद- परिषत्- अध्यक्षपदेषु भाजपा- समर्थित- प्रत्याशिनाम् आधिपत्यम् आसीत्। ईदृशी स्थितौ भाजपा-पक्षस्य पुरतः स्वकीयं सुदृढं दुर्गं रक्षितुं महदाह्वानम् वर्तते। अन्यतः, सत्तासीनः काङ्ग्रेसपक्षः ग्रामीण-राजनीतौ प्रवेशं कृत्वा नूतनं राजनैतिक-समीकरणं रचयितुं सज्जः अस्ति। मुख्यमन्त्रिणः सुक्खुमहोदयस्य कार्यकाले प्रथमवारं पञ्चायतीराज-संस्थानां निर्वाचिनि भवन्ति, अतः जिला-परिषदः परिणामाः कुत्रचित् सर्वकारस्य प्रदर्शनस्य जनमतस्य च परिचायकाः भविष्यन्ति। यदि काङ्ग्रेस-पक्षः जिला-परिषत्सु अग्रसरः भवति, तर्हि एतत् सर्वकारस्य पक्षे जनसमर्थनं मन्यते। पञ्चायत-निर्वाचनानि अधुना विधायकानां मन्त्रिणां च प्रतिष्ठया अपि सम्बद्धानि मन्यन्ते। एवं सति जिला-परिषदः परिणामानन्तरं सर्वेषु जिलापरिषदः अध्यक्षपदं प्राप्तुम् उभयोः राजनैतिक-पक्षयोः राजनैतिक-प्रभुत्वस्य अपि परीक्षा एतेषु निर्वाचनेषु भविष्यति। स्पष्टमस्ति यत् काङ्ग्रेस-पक्षः पूर्वमेव उद्घोषितवान् यत् पञ्चायतीराज-संस्थानां निर्वाचनेषु पक्षः साक्षात् रूपेण अधिकृतप्रत्याशिनः न घोषयिष्यति, प्रत्याशिचयने च सङ्घटनस्य औपचारिकः हस्तक्षेपः अपि न भविष्यति। तथापि स्थानीय-विधायकाः काङ्ग्रेसपक्षस्य वरिष्ठाः नेतारश्च स्व-स्वक्षेत्रेषु सामञ्जस्यं स्थापयित्वा पक्षस्य विचारधारा-सम्बद्धानां प्रत्याशीनां समर्थनं कुर्वन्ति। सङ्गठने प्रदेशस्तरे दायित्वं निर्वहन्तः नेतारः अपि निरन्तरं कार्यकर्तृभ्यः काङ्ग्रेस- समर्थित- विचारधारा- युक्त- प्रत्याशिनां समर्थनाय आवेदनं कुर्वन्ति। अन्यतः, भाजपापक्षः पञ्चायत- निर्वाचनेषु स्वकीये पुराते सङ्गठनात्मक-जालस्य तथा 'बूथ'-स्तरीयायस्य प्रभावस्य आधारेण क्षेत्रे अवतरति। पूर्व-कार्यकाले जनपद-परिषत्सु पक्षस्य वर्चस्वम् आसीत्, भाजपा च एतामेव अग्रसरताम् अक्षुण्णां स्थापयितुं रणनीतिं सज्जं करोति। पक्षनेतृणां विश्वासः अस्ति यत् ग्रामीणक्षेत्रेषु भाजपा-पक्षस्य आधारभूतः प्रभावः अद्यापि सुदृढः अस्ति, एतदेव तस्य महती शक्तिः भविष्यति।

## पञ्चायत-निर्वाचनानां प्रभावः

पञ्चायतीराज-निर्वाचनानि साक्षात् पक्ष-चिह्नेन न जायन्ते, किन्तु वास्तविकं राजनैतिकं चित्रं निर्वाचन-परिणामानन्तरमेव सम्मुखं आयाति। प्रत्याशिनः निर्दलीयरूपेण निर्वाचनं प्रतिस्पर्धयन्ति, किन्तु जनपद-परिषत्-अध्यक्षस्य उपाध्यक्षस्य च निर्वाचन-काले तेषां राजनैतिक-वृत्तिः स्पष्टरूपेण प्रकटा भवति। एतदेव कारणमस्ति यत् परिणामानन्तरं राजनैतिक-समीकरणानां रणनीतीनां च क्रमः तीव्रः भवति। राजनैतिक- विश्लेषकाणां मतमस्ति यत् पञ्चायत-निर्वाचनेषु सङ्गठनस्य वास्तविकी शक्तिः सम्मुखं आयाति। एतेषु निर्वाचनेषु स्थानीयसमीकरणानि, वैयक्तिक- सम्पर्काः, क्षेत्रीयप्रभावाश्च निर्णायकभूमिकां निर्वहन्ति।

# मुख्यमन्त्रिणा 'रेडी-एचपी' परियोजनायाः समीक्षा कृता; सुदृढाधारभूतसंरचनायाम् आजीविकासंरक्षणे च बलं दत्तम्

**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्रिणा सुखविंदरसिंह सुक्खुना मङ्गलवासरे अत्र 'रेजिलिएण्ट ऐक्शन फॉर डेवलपमेण्ट एण्ड डिजास्टर रिकवरी हिमाचल प्रदेश' (रेडी-एचपी) परियोजनायाः प्रगतिः तथा क्रियान्वयनम् इति विषये आयोजितायाः उच्चस्तरीयोपवेशनस्य अध्यक्षता कृता। तेन उक्तं यत् 2687 कोटिरूप्यकव्यययुक्ता एषा महत्त्वाकाङ्क्षिणी योजना प्रदेशे आपदाप्रबन्धनक्षमतां सुदृढां कर्तुं तथा प्राकृतिकापदाभिः जायमानं क्षतिं न्यूनां कर्तुं प्रभावी दूरदर्शिनी च पहलरूपेण सिद्धा भविष्यति।मुख्यमन्त्रिणा प्राकृतिकापदाभिः वर्धमानप्रभावस्य उल्लेखः कृतः। तेन उक्तं यत् वर्षेषु 2023 तः 2025 पर्यन्तं प्रदेशे मेघविस्फोटस्य 86, भूमिस्खलनस्य 234 तथा बाढस्य 121 घटनाः अभिलेखिताः, येभ्यः प्रदेशाय 12,500 कोटिरूप्यकाधिकं वित्तीयनुकसानम् अभवत्। तेन उक्तं यत् हिमाचलप्रदेशः संवेदनशीले हिमालयीय-भूवैज्ञानिकक्षेत्रे स्थितत्वात् प्राकृतिकापदासु अत्यन्तं संवेदनशीलः अस्ति।मुख्यमंत्रिणा उक्तं यत् अस्याः परियोजनायाः प्रमुखोद्देश्यम् आपदाग्रस्तानाम् आधारभूतसंरचनानां, यथा मार्गाणां, जलापूर्तियोजनानां, विद्युत्सेवायाः तथा आजीविकापरियोजनानां पुनर्स्थापनं कर्तुम् अस्ति। तेन उक्तं यत् अस्याः परियोजनायाः उद्देश्यं सम्पूर्णराज्ये आपदानन्तरं पुनर्वासाय सुदृढं प्रभावी च तन्त्रं विकसितुं वर्तते। रेडी-एचपी परियोजना प्राकृतिकापदानन्तरं जनानां शीघ्रराहतप्रदानं सुदृढपुनर्वासव्यवस्थां च सुलभां करिष्यति। एषा योजना शासकीयसेवानां गुणवृद्ध्यर्थं कार्यं करिष्यति तथा 'ग्रीन पंचायत' इत्यादियोजनाभिः जनानां कृते नवीनरोजगारावसरान् प्रदास्यति, सामाजिकसुरक्षा तथा बीमाव्यवस्था च सुदृढा भविष्यति। तेन कृषकाणां फलोत्पादकानां च कृते सुदृढसुविधानां आधारभूतसंरचनायाश्च निर्माणस्य आवश्यकतायाः उपरि बलं दत्तम्, येन प्राकृतिकापदासु तेषां सस्यं आजीविका च सुरक्षिते भवेताम्। उपवेशने मुख्यसचिवः संजय गुप्ता, अतिरिक्तमुख्यसचिवः अन्ये वरिष्ठाधिकारिणश्च उपस्थिताः आसन्।

# प्रदेशाय ३१ मई पर्यन्तं सज्जा भवतु पोषणनीतिः, मुख्यमन्त्रिणः निर्देशाः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-सर्वकारेण राज्ये स्वास्थ्यसेवाः सुदृढीकर्तुं जनेभ्यः च उत्तमं पोषणं उपलब्धं कारयितुं महान् पदक्षेपः स्वीकृतः। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना स्वास्थ्यविभागः ३१ मई पर्यन्तं राज्यस्य पोषणनीतिं निर्मातुं निर्दिष्टः। सोमवासरे सायङ्काले स्वास्थ्यविभागस्य वरिष्ठैः अधिकारिभिः सह आयोजिते उपवेशने मुख्यमन्त्रिणा उक्तं यत् 'फिट हिमाचलम्' (स्वस्थ- हिमाचलम्) इति लक्ष्यं प्राप्तुं जनान् पोषणयुक्त-भोजनस्य महत्त्वं प्रति जागरूकं करणम् अत्यन्तम् आवश्यकम् अस्ति।

## अस्मिन् विषये देशस्य प्रथमं राज्यं भवितुं शक्नोति हिमाचलप्रदेशः

सर्वकारस्य विश्वासः अस्ति यत् हिमाचलप्रदेशः व्यापकां पोषणनीतिं सज्जीकर्तुं देशस्य प्रथमं राज्यं भवितुं गच्छति। मुख्यमन्त्रिणा उक्तं यत् उत्तमस्वास्थ्याय केवलं चिकित्सा एव न, अपितु उचितं खानपानं पोषणं चापि अनिवार्यं वर्तते। एतदेव विचिन्त्य सर्वकारः पोषणनीतिं अन्तिमरूपं दातुं संलग्नः अस्ति।

## रुग्णानां सम्पूर्णं विवरणम् 'अङ्कीकृतं भविष्यति

उपवेशनस्य अन्तराले मुख्यमन्त्रिणा स्वास्थ्यसेवासु अङ्कीकरणं तीव्रं कर्तुं निर्देशाः दत्ताः। तेन उक्तं यत् रुग्णानां सम्पूर्णं विवरणम् अन्तर्जालपुटे उपलब्धं कारयितव्यं, येन जनेभ्यः पञ्जीकरणाय, परीक्षण-प्रतिवेदनेभ्यः अन्य-प्रपत्रेभ्यः च चिकित्सालयेषु कष्टं सोढव्यं न भवेत्। अनेन स्वास्थ्यसेवाः पूर्वमपेक्षया सरलाः प्रभाविन्यः च भविष्यन्ति।

## आईजीएमसी-चिकित्सालयात् आरप्स्यते 'पायलट-परियोजना'

मुख्यमन्त्रिणा इन्दिरागान्धी- आयुर्विज्ञान- महाविद्यालये चिकित्सालये च परीक्षण-प्रकल्पत्वेन पैथोलॉजी, रेडियोलॉजी, माइक्रोलॉजी, बायो- केमिस्ट्री तथा फार्मेसी विभागानां सम्पूर्णं विवरणं अङ्कीकर्तुं निर्देशाः दत्ताः। अस्य कृते पर्याप्त- कर्मचारिणां प्रदाने अपि आश्वासनं दत्तम्। सर्वकारस्य योजना अस्ति यत् पश्चात् एषा व्यवस्था 'आईजीएमसी' इत्यस्य सर्वेषु विभागेषु राज्यस्य अन्य-आयुर्विज्ञान- महाविद्यालयेषु च विस्तारयिष्यते।

## स्वास्थ्यसुविधासु ३००० कोटि-रूप्यकाणि व्ययिष्यति सर्वकारः

मुख्यमन्त्रिणा उक्तं यत् प्रदेशवासिभ्यः विश्वस्तरीयाः स्वास्थ्यसुविधाः दातुं सर्वकारः कटिबद्धः अस्ति। स्वास्थ्य-व्यवस्थां सुदृढीकर्तुं अत्याधुनिक-यन्त्राणां उपकरणेषु च प्रायः ३००० कोटि-रूप्यकाणां व्यय- योजना निर्मिता अस्ति। एतदतिरिच्य त्रिषु आयुर्विज्ञान-महाविद्यालयेषु स्वचालित- प्रयोगशालानां स्थापनाय ७५ कोटि-रूप्यकाणि स्वीकृतानि। सर्वकारः आयुर्विज्ञान-महाविद्यालयेषु 'सीनियर रेजिडेंट' वैद्यानां स्थानानि द्विगुणानि कर्तुं कार्यं करोति। मुख्यमन्त्रिणा उक्तं यत् चिकित्सालयानाम् उत्तमसञ्चालने रुग्णानां गुणात्मक-चिकित्सायां च एतेषां वैद्यानां प्रमुखा भूमिका भवति।

# चिट्टा-विक्रयिणः अधिकारिणः कर्मचारिणः च भविष्यन्ति पदच्युताः, सेवनकर्तृणां भविष्यति अन्वेषणं विभागीय-सचिवेभ्यः प्रदत्ता सूची




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-सर्वकारेण 'चिट्टा' तथा अन्य- 'एनडीपीएस' प्रकरणेषु संलिप्तानां सर्वकारीय-अधिकारिणां कर्मचारिणां च विरुद्धं कठोरा कार्यविधिः प्रारब्धा। अधुना चिट्टा-विक्रयिणः सर्वकारीय- अधिकारिणः कर्मचारिणः च पदच्युताः (बर्खास्त) भविष्यन्ति, सेवनकर्तृणां च विभागीय-अन्वेषण- प्रक्रिया भविष्यति। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना उक्तं यत् प्रदेश-सर्वकारः मादकद्रव्य-विरुद्धं व्यापकम् अभियानं चालयति, मादकद्रव्य-तस्करेषु संलिप्तानां सर्वकारीय- कर्मचारिणां कृते च 'शून्य-सहनशीलता' नीतिः स्वीकृता। मङ्गलवासरे प्रदेश-सचिवालये आयोजिते उपवेशने चिट्टा-प्रकरणेषु संलिप्तानां कर्मचारिणां सूची विभागीय-सचिवेभ्यः प्रदत्ता।

## अधुना चिट्टाप्रकरणेषु एवं भविष्यति कार्यविधिः

मुख्यमन्त्रिणा उक्तं यत् अधुना कार्यविधिः अस्य आधारेण भविष्यति यत् सम्बन्धितः अधिकारी कर्मचारी वा चिट्टा-व्यापारे संलिप्तः अस्ति उत सेवनप्रकरणे गृहीतः। तेन स्पष्टीकृतं यत् ये कर्मचारिणः नशाव्यापारे संलिप्ताः प्राप्स्यन्ते, ते सेवायाः निष्कासिताः भविष्यन्ति, सेवनकर्तृणां विरुद्धं च नियमानुसारं कार्यविधिः भविष्यति। सर्वकारस्य अङ्किकानुसारं प्रदेशे अधुना यावत् १२२ सर्वकारीय-अधिकारिणः कर्मचारिणः च चिट्टा तथा अन्येषु एनडीपीएस-प्रकरणेषु संलिप्ताः प्राप्ताः। एतेषु ३१ कर्मचारिणां सेवाः समाप्ताः कृताः सन्ति। मुख्यमन्त्रिणा सर्वान् प्रशासनिक-सचिवान् ईदृशेषु प्रकरणेषु कठोरविभागीय-कार्यविधिं सुनिश्चितं कर्तुं निर्देशः दत्तः।

## सर्वाधिक-प्रकरणानि आरक्षक-विभागे

सूची-अनुसारं सर्वाधिकानि २१ प्रकरणानि हिमाचलप्रदेश-आरक्षक-विभागात् प्राप्तानि, सर्वे २१ कर्मचारिणः च सेवायाः पदच्युताः कृताः। विद्युत्-मण्डलस्य १३ कर्मचारिषु एकः निष्कासितः, शिक्षाविभागस्य १० कर्मचारिणः अन्वेषणपरिधौ सन्ति। बैङ्किङ्ग- जलशक्ति- विभागयोः ९-९ कर्मचारिणः प्रकरणेषु संलिप्ताः प्राप्ताः। सेना- नौसेनाभ्यां सम्बद्धानां ८ कर्मचारिणां नामानि अपि सूच्यां अङ्कितानि सन्ति। 'एचआरटीसी' (HRTC) इत्यस्य ८ कर्मचारिषु २ कर्मचारिणां सेवाः समाप्ताः। वनविभागस्य लोक- निर्माण- विभागस्य च ६-६ कर्मचारिणः अन्वेषण-परिधौ सन्ति। स्वास्थ्य-विभागस्य ४ तथा 'बीडीओ' कार्यालयस्य ३ कर्मचारिणां विरुद्धं कार्यविधिः पञ्जीकृता, येषु बीडीओ-कार्यालयस्य २ कर्मचारिणौ पदच्युतौ कृतौ। एतदतिरिच्य खाद्य-आपूर्ति, पशुपालन-अन्य-विभागानां कर्मचारिषु अपि विभागीय-कार्यविधिः प्रचलति। सर्वकारेण स्पष्टीकृतं यत् नशा-तन्त्रात् सम्बद्धः कोऽपि कर्मचारी न त्यक्ष्यते।

## "लौकिकन्यायकोशः" "अर्कमधुन्यायः"

अर्क इत्यस्य कार्पासवृक्ष इति अर्थः। यदि समीपवर्तिनि अर्कवृक्षे मधु प्राप्तुं शक्यते चेत् पर्वतं गत्वा मधोः अन्वेषणस्य कोलाहलः किमर्थं करणीयः? यत् अल्पेन परिश्रमेण किमपि साधयितुं शक्यते चेत् तदर्थं निष्कारणमेव महान् परिश्रमः न करणीयः इति अनेन न्यायेन सूच्यते।

**अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्।**

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

## वार्तासंवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमो नमः नन्दिनि। अद्य काः विचित्राः वार्ताः सन्ति?

**नन्दिनी-** काव्ये, प्रथमं तु यन्त्राणां वार्ता। अमेरिकादेशस्य कतिपयराज्यैः "कृत्रिमबुद्धेः" विधिक-व्यक्तित्वस्य निषेधाय विचारः कृतः।

**काव्या-** एतद् उचितं कार्यम्। यदि यन्त्राणि मानवाः इव भवेयुः, तर्हि अपराधे सति कः दण्डनीयः? अस्तु, अधुना धनस्य वार्तां शृणु। बेङ्गलुरुनगरे एकेन "आमजोन" कर्मकरेण उक्तं यत् तेन केवलं एकपञ्चाशत्-सहस्र-रूप्यकैः उत्तमं जीवनं कृतम् अस्ति।

**नन्दिनी-** सत्यम्, मितव्ययिता एव सुखस्य मूलम्। अतः, अतिव्ययः न करणीयः। बेङ्गलुरु-नगरे एव एकाभ्यां दम्पतिभ्यां स्वस्य मास-व्ययः प्रदर्शितः। ताभ्याम् एकलक्ष-त्रिंशत्-सहस्र-रूप्यकाणां व्ययः कृतः। एतेन वार्ता-पटलेषु महती चर्चा आरब्धा।

**काव्या-** आम्, धनस्य विषयः सर्वदा जनान् उत्तेजयति। केचन विलासम् इच्छन्ति, केचन सरलताम्। परं मार्गे यानसम्मर्दः तु सर्वेषां कृते कष्टकरः। पश्य, भाग्यनगरे एकेन पुरुषेण द्वादश-सहस्रमानं दूरं केवलं त्रिंशन्निमेषु अतिक्रान्तम्। तेन उक्तं यत् "बेङ्गलूरु-नगरस्य जनाः एतत् चिन्तयितुमपि न शक्नुवन्ति" इति।

**नन्दिनी-** हा! बेङ्गलूरु-नगरस्य मार्गेषु तु यानानि केवलं तिष्ठन्ति। भाग्यनगरस्य वेगः तु प्रशंसनीयः, किन्तु भाग्यनगरस्य वेगः तु भविष्यत्काले न्यूनीभवेत्। अस्तु, एताः आसन् अद्यतन्यः विचित्राः वार्ताः। श्वः पुनर्मेलिष्यामः। धन्यवादाः।



## परब्रह्माष्टकम्

हिरण्यगर्भदेवाय विश्वदेवाय ते नमः।
नमो तत्त्वाय सत्याय परब्रह्म नमोऽस्तु ते।।१।।
विश्वाय विश्वकाराय विश्वसेव्याय ते नमः।
विश्वम्भराय व्यक्ताय परब्रह्म नमोऽस्तु ते।।२।।
तत्त्वाय तत्त्वगम्याय श्रुतिगम्याय ते नमः।
सर्वज्ञाय स्वतंत्राय परब्रह्म नमोऽस्तु ते।।३।।
सर्वेश्वराय शर्वाय सर्वधीशाय ते नमः।
श्रीमदानन्दरूपाय परब्रह्म नमोऽस्तु ते।।४।।
स्वप्रकाशाय सिद्धाय सर्वाश्रयाय ते नमः।
नेतिनेतीतिगम्याय परब्रह्म नमोऽस्तु ते।।५।।
निरंजनाय नित्याय निर्विकल्पाय ते नमः।
सद्योजाताय शुद्धाय परब्रह्म नमोऽस्तु ते।।६।।
निर्गुणाय निष्कलाय वेदगर्भाय ते नमः।
सदाव्यक्ताय सेव्याय परब्रह्म नमोऽस्तु ते।।७।।
सर्वान्तकाय देवाय सत्यनाथाय ते नमः।
अव्यक्ताय पुरुषाय परब्रह्म नमोऽस्तु ते।।८।।

**नृसिंहवल्लभाचार्यदेशिकेन्देण निर्मितम्।**
**परब्रह्मष्टकमेतच्छ्रीभक्तमुक्तिप्रदायकम्।।**

## राष्ट्रिय-शिक्षा-नीत्याः अन्तर्गतं कौशल-शिक्षायाः ऋण-प्रणाल्याः च सुदृढीकरणस्य आवश्यकता: शिक्षामन्त्री धर्मेन्द्र प्रधानः



शिक्षामन्त्री धर्मेन्द्र प्रधानः कौशल-आधारितां शिक्षाप्रणालीम् आवश्यकीं कथयन् राष्ट्रिय-शिक्षा-नीत्याः अन्तर्गतं सुदृढां ऋण-प्रणालीं (Credit System) विकसितुं बलं दत्तवान् अस्ति। नवदिल्ल्यां अद्य भारतीय-उद्योग-परिसङ्घस्य (CII) वार्षिक-व्यापार-शिखरसम्मेलने सः उक्तवान् यत् छात्रेभ्यः अधिकां सहायताम् अवसरान् च प्रदातुम् 'इन्टर्नशिप' तथा 'अप्रेंटिसशिप' इत्येतदपि ऋण-तन्त्रे सम्मिलितं करणीयम्। केन्द्रीयमन्त्रिणा भारतस्य शिक्षाप्रणाली विश्वस्य सुदृढतमा शिक्षाप्रणाली इति प्रोक्ता। सः अवदत् यत् देशे १० लक्षं राजकीयविद्यालयान् सहितं प्रायः १५ लक्षं विद्यालयाः सन्ति। केन्द्र-राज्यसर्वकाराः मिलित्वा शिक्षायाम् देशस्य सकल-घरेलु-उत्पादस्य (GDP) प्रायः चतुः प्रतिशतं व्ययं कुर्वन्ति।

## 'बोधकथा' जीवनपाठाः

एकदा कश्चन साधुः कुत्रचित् गच्छति स्म। मार्गे एका व्यक्तिः पञ्च गर्दभोऽपरि साहित्यं वहन् तं प्राप्नोत्। साधुः तम् अपृच्छत्- त्वं कः असि? व्यक्ति उत्तरत- अहं वणिक् अस्मि। साधुः- कानि कानि वस्तुनि वाणिज्यं करोषि?

व्यक्ति- गर्दभोऽपरि यानि वस्तूनि सन्ति तानि वस्तूनि अहं विक्रीणामि। साधुः- कानि वस्तूनि सन्ति?

व्यक्ति- प्रथमो गर्दभोऽपरि अस्ति अत्याचारः, द्वितीयोऽपरि अहङ्कारः, तृतीयोऽपरि ईर्ष्या, चतुर्थोऽपरि विश्वासघातः, पञ्चमे वञ्चनवञ्चनाभारितम्। साधुः- एतादृशी वस्तूनि कः क्रीणाति?

व्यक्ति- शासकाः अत्याचारः क्रीणान्ति। अहङ्कारः सांसारिकाः जनाः क्रीणान्ति। विद्वद्भ्यः ईर्ष्या रोचन्ते। विश्वासघातः वणिकाः प्रियः। वञ्चनवञ्चना स्त्रियः क्रीणान्ति। मम नाम श्रुतवान् वा? जनाः मां पिशुनः इति वदन्ति। समस्त जनाः मां प्रतीक्षन्ते न तु ईश्वरम्। मम वाणिज्ये केवलं लाभेव अस्ति।

साधुः- किन्तु त्वं कुत्र गच्छन् असि?

व्यक्ति- क्रेतारः अन्विष्यन्ते। सः पिशुनः गतवान्। सः अद्यापि क्रेतारः कृते भ्रमति। सतर्कं तिष्ठतु। अस्य ग्राहकः कदापि मा भवतु।

**डॉ. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

# अधिकमासः, दानधर्मः, त्रयस्त्रिंशद्वस्तूनि, अपूपदानपरम्परा च




मईमासस्य १७ दिनाङ्कात् आरभ्य अधिकज्येष्ठमासः प्रारभ्यते। वस्तुतः अधिकमासः एकः साधारणः खगोलशास्त्रीयः व्यवस्थाविशेषः अस्ति। आङ्ग्लसौरवर्षम् ३६५ दिवसात्मकं भवति, अस्माकं चान्द्रवर्षं तु ३५४ दिवसात्मकम्। प्रतिवर्षं एषः भेदः ११ दिवसानां भवति। त्रिवर्षेषु एषः भेदः ३३ दिवसात्मकः भवति, तस्य परिहारार्थम् एकः अधिकमासः आगच्छति।

प्रतित्रिवर्षं आगच्छतः अस्य अधिकमासस्य महत्त्वं, व्रतानि, दानधर्मः, त्रयस्त्रिंशद्वस्तूनां दानम्, जामात्रे दीयमानं दानम् इत्यादीनां विषये किञ्चित् ज्ञास्यामः।

अस्य मासस्य अधिकमासः, मलमासः, पुरुषोत्तममासः इति नामानि सन्ति। संवत्सरस्य मासपङ्क्तौ मध्ये आगच्छति इति कारणेन "धोंड्यामासः" अथवा "धोंडामासः" इति अपि कथ्यते। सामान्यतः क्रियमाणानि शुभकार्याणि, होमहवनानि, पूजाः, व्रतानि च अस्मिन् अधिकमासे वर्जितानि मन्यन्ते। अतः प्राचीनकाले जनानां कृते एषः कालः विशेषव्रतपूजादानधर्मादिभिः पूर्वकृतपापक्षालनस्य अवसरः आसीत्।अद्यत्वे त्वक्शुद्ध्यर्थं, शरीरशुद्ध्यर्थं च विविधाः लेपाः, जकुजी-स्नानानि, सौना-स्नानानि, निसर्गोपचाराश्च प्रचलन्ति। किन्तु अस्माकं धर्मे उपवासः, नियताहारः, अल्पाहारः, विशिष्टाहारः इत्यादिभिः सरलसुलभैः उपायैः शरीरशुद्धेः व्यवस्था कृता अस्ति।पूजाव्रतदानधर्मादिभिः आत्मनः शुद्धिरपि भवति। मौनव्रतम्, मन्त्रजपः, स्तोत्रपठनम्, धार्मिकग्रन्थपठनम् इत्यादिभिः मनसः अपि शुद्धिः भवति। मनसः आहारस्य च सम्यक् संयोजनं कृत्वा एतानि कार्याणि क्रियमाणानि चेत् उत्तमफलानि लभ्यन्ते। प्रतित्रिवर्षम् एकवारम् आगच्छतः अधिकमासस्य एतदेव वैशिष्ट्यम्। अधिकमासात् पूर्ववर्तीषु त्रिषु वर्षेषु कृतानां पापानां प्रक्षालनं कुरुत। स्वयमेव स्वस्य काय-वाक्-मनसां शुद्धिं कुरुत। अधिकमासे परम्परया क्रियमाणानि व्रतवैकल्यादीनि तत्तत्कालानुकूलानि आसन्। तेषां यथार्थं ज्ञात्वा, अद्यतनकालानुकूलतया, स्वशरीरस्य सामर्थ्यानुसारं, स्थानीयपरिस्थित्यनुसारं च तानि आचरितुं शक्यन्ते।

अधिकमासे कृतानां पुण्यकर्मणां फलं सामान्यकालात् अधिकं भवति इति विश्वासः अस्ति- "अधिकस्य अधिकं फलम्" इति।अधिकमासः भगवान् विष्णोः मासः इति मन्यते। अस्मिन् मासे विविधव्रतानि आचर्यन्ते। तेषु प्रदेशानुसारं, कुलाचारानुसारं च भेदाः दृश्यन्ते। दिवसस्य किञ्चित्कालं मौनव्रतधारणम्, प्रतिदिनं नियतकाले देवालयगमनम्, दीपप्रज्वालनम्, दानम्, उपवासः इत्यादयः सरलाः आचाराः आसन्। भगवतः विष्णोः प्रति प्रतिदिनं समानप्रकाराणि ३३ पुष्पाणि समर्पयितुं, ब्राह्ममुहूर्ते उत्थाय विष्णुपूजां कर्तुं, विष्णुसहस्रनाम, विष्णुसूक्तं च पठितुं परम्परा आसीत्। ताम्बूलम्, दीपः, फलानि, धान्यम्, वस्त्राणि इत्यादीनां दानमपि क्रियते स्म।"धारणा-पारणम्" इति अपि एकं व्रतम् आसीत्। एकस्मिन् दिने पूर्णोपवासः धार्यते स्म, परदिने तस्य पारणं क्रियते स्म। एवं मासपर्यन्तं व्रतमाचर्यते स्म।

अधिकमासे प्रतिदिनं यथाशक्ति किञ्चिदपि दानं करणीयम्, अल्पाहारः करणीयः, कस्यचित् किमपि न स्वीकरणीयम् (अयाचितव्रतम्), सद्वर्तनम्, सत्यवचनम् इत्यादीनां भविष्योत्तरपुराणे प्रशंसा कृता अस्ति। भगवद्गीतायाः पञ्चदशोऽध्यायः "पुरुषोत्तमयोगः" अस्मिन् मासे विशेषतया पठ्यते। अस्मिन् अध्याये भगवान् विष्णोः श्रेष्ठत्वं, संसारस्वरूपं, जीवनमार्गदर्शनं च प्रतिपादितम् अस्ति। अस्मिन् मासे "अधिकमासवर्तिका" नाम विशेषवर्तिका अपि प्रज्वाल्यते। हस्तस्य चतुर्णां अङ्गुलीनां परितः सूत्रस्य एकः फेरः इति प्रकारेण षोडशपूर्णफेराः अर्धफेरश्च कृत्वा एका वर्तिका निर्मीयते। एवं द्वे वर्तिके मिलित्वा त्रयस्त्रिंशत्फेरयुक्ता संयुक्तवर्तिका भवति। तां घृतदीपेन सह भगवान् विष्णोः पुरतः प्रज्वालयन्ति। "वेणीमाधववर्तिका" विषये श्रुतम्। त्रयस्त्रिंशत्पुष्पवर्तिकाभिः संयुक्ता भवति। "वेणीमाधवः" ब्रह्मविष्णुमहेशानां संयुक्तस्वरूपम् अस्ति। लक्ष्म्या सह तस्य स्थायिनिवासः प्रयागराजे गङ्गायमुनासरस्वतीनां त्रिवेणीसङ्गमे अस्ति इति विश्वासः। अधुना पश्यामः- अस्मिन् मासे "३३" सङ्ख्यायाः महत्त्वं किम्? वास्तवतः ३३ सङ्ख्या हिन्दू, बौद्ध, यहूदी, ख्रिस्तीय, मुसलमानादिषु प्रमुखधर्मेषु महत्त्वपूर्णा मन्यते। वसिष्ठसिद्धान्तानुसारम् अधिकमासः ३२ मासानन्तरं १६ दिवसैः अष्टघटीभिश्च सह आगच्छति, अर्थात् प्रायः ३३ मासानन्तरम्। एतेषां ३३ मासानां प्रतीकरूपेण ३३ वस्तूनां दानं क्रियते। अस्माकं मासः सामान्यतः ३० दिवसात्मकः भवति, अतः यदि कोऽपि नियमः प्रतिदिनं एकवारं क्रियते, तर्हि अन्तिमेषु त्रिषु दिनेषु तद् द्विवारं कृत्वा ३३ सङ्ख्या पूर्णा क्रियते।

## अपूपदानस्य कारणम्-

अस्मिन् काले अपूपदानं कृत्वा पृथ्वीदानसमं फलं लभ्यते इति मन्यते स्म। शास्त्रेषु वटकः तथा अपूपः कदापि शुष्कशिष्टभोजनं न मन्येते। अपूपः सच्छिद्रः जालिकायुक्तश्च भवति। अतः केचन तादृशं जालिकायुक्तं मैसूरपाकं बत्तासान् वा ददति। तेन सह ताम्बूलं दक्षिणा च दीयते। महाराष्ट्रप्रदेशे कांस्यपात्रेण अपूपदानस्य परम्परा अस्ति।

### अधिकमासे जामात्रे दानं कुतः दीयते?

जामाता विष्णुस्वरूपः मन्यते। पूर्वकाले विवाहसमये वृद्धाः अपि स्वस्मात् कनिष्ठं नवदम्पती "लक्ष्मीनारायणस्वरूपम्" इति मत्वा प्रणमन्ति स्म। अनुरूपदम्पत्योः विषये "लक्ष्मीनारायणयोः युगलम्" इति कथ्यते स्म। अद्यापि अनेकजनाः एकादशीपारणार्थं, सत्यनारायणपूजार्थं, दम्पतीभोजनार्थं कन्यां जामातरं च निमन्त्रयन्ति। अधिकमासे जामात्रे दानदानेऽपि अयमेव भावः अन्तर्निहितः अस्ति। दीपदानं वंशवृद्धेः प्रतीकं मन्यते।

अस्य एकः हास्यपूर्णः सामाजिकः पक्षोऽपि अस्ति। पूर्वकाले जामातृपक्षीयाः जनाः कन्यापितुः समीपात् निरन्तरं वस्तूनि याचन्ते स्म। विवाहपूर्ववर्तिनिषु चर्चासु अपि विविधाः अपेक्षाः भवन्ति स्म। तथापि कन्यायाः सुखार्थं पिता सततं किमपि ददाति स्म। नवग्रहाः यथा मनुष्यं क्लेशयन्ति, तथैव जामाता अपि "दशमग्रहः" इति विनोदेन कथ्यते स्म।

**सदा वक्रः सदा रुष्टः**
**सदा पूजामपेक्षते।**
**कन्याराशिस्थितो नित्यं**
**जामाता दशमो ग्रहः॥**
**आदित्याद्या ग्रहाः सर्वे**
**यथा तुष्यन्ति दानतः।**
**सर्वस्वेपि न तुष्येत्**
**जामाता दशमो ग्रहः॥**

अस्य "जामातृग्रहस्य" शान्त्यर्थमपि एतानि दानानि दीयन्ते स्म। अद्यत्वे तु एषु परम्परासु स्वागतार्हः परिवर्तनः दृश्यते।अधिकमासे व्रतम्, उपवासः, नियमपालनं वा करणीयं वा न वा एतत् प्रत्येकस्य स्वनिर्णयस्य विषयः अस्ति। यदि एतानि आचरितुमिच्छथ, तर्हि परम्परा, धर्मशास्त्रं, विज्ञानं, खगोलशास्त्रं च संयोजयन्ती एषा सूचना उपयोगिनी भविष्यति।

-सुधा साठ्ये, मुम्बई।
sudha_sathaye@yahoo.com




# भ्रातृबान्धवाः के उच्यन्ते?

(प्राचीनभारतीयतर्कपरम्पराः वंशक्रमः, गुणसूत्राणि, सम्बन्धश्च)

१) प्रथमः वंशक्रमः- दम्पती।
पतिपत्न्योः १००% गुणसूत्रसाम्यम् (DNA) भवति।

२) द्वितीयः वंशक्रमः- पुत्राः-पुत्र्यः (सहोदराः)।
मातापित्रोः प्राप्तानि ५०-५०% गुणसूत्राणि भवन्ति। अयं वंशक्रमः ५०% गुणसूत्राणि रक्षति।

३) तृतीयः वंशक्रमः- पौत्राः-पौत्र्यः।
अयं वंशक्रमः पितामहपितामह्योः २५% गुणसूत्राणि साझयति।

४) चतुर्थः वंशक्रमः- अयं वंशक्रमः प्रथमवंशक्रमस्य १२.५% गुणसूत्राणि साझयति।

५) पञ्चमः वंशक्रमः- अयं वंशक्रमः प्रथमवंशक्रमस्य ६.२५% गुणसूत्राणि साझयति।

६) षष्ठः वंशक्रमः- अयं वंशक्रमः प्रथमवंशक्रमस्य ३.१२% गुणसूत्राणि साझयति।

७) सप्तमः वंशक्रमः- अयं वंशक्रमः प्रथमवंशक्रमस्य १.५६% गुणसूत्राणि साझयति।

८) अष्टमः वंशक्रमः- अयं वंशक्रमः प्रथमवंशक्रमस्य १% न्यूनानि गुणसूत्राणि सन्ति।

अतः मूलदम्पत्योः आरभ्य सप्तमवंशक्रमपर्यन्तं सम्बन्धः भ्रातृबान्धवता च मान्येते। सम्बन्धिषु सप्तमवंशक्रमपर्यन्तं विवाहः निषिद्धः मन्यते। सम्बन्धिषु विवाहे कृते जन्मजातगुणसूत्रजन्यरोगाणां सम्भावना भवति।

अष्टमवंशक्रमात् आरभ्य सम्बन्धः भ्रातृबान्धवता च न मन्यते। अत एव पतिपत्न्योः सम्बन्धः सप्तजन्मपर्यन्तम् इति कथ्यते। सप्तजन्मपर्यन्तं तत्सम्बन्धः तिष्ठति।

त्रयः वंशक्रमाः सपिण्डाः मन्यन्ते। चतुर्थात् आरभ्य सप्तमपर्यन्तं सपिण्डत्वं न भवति, किन्तु भ्रातृबान्धवता भवति।

सप्तवंशक्रमानन्तरं सम्बन्धः समाप्तिं गच्छति, तथापि ते सगोत्राः एव भवन्ति।

नूनम् अस्माकं पूर्वजाः अतीव ज्ञानवन्तः आसन् इति विषये अस्माभिः गौरवं कर्तव्यम्।

सप्तवंशक्रमाणाम् उल्लेखः सर्वदा क्रियते, किन्तु तस्य पृष्ठतः कारणम् अद्य अवगतं जातम्॥

.... सुधा साठये, मुंबई